इति हेमचन्द्रः ॥ ( यथा, कथासरित्सागरे । १ । ५८ ।

"निपत्य पादयोस्ताभ्यां जयया सह बोधिता ।
शापान्तं प्रति शर्व्वाणी शनैर्व्वचनमब्रवीत् ॥")

दन्त्यसादिरप्ययं शब्दः ॥

शर्शरीकः, पुं, ( शॄ + "शॄपॄवृणां हेरक् चाभ्यासस्य ।" उणा० ४।२६। इति ईकन् द्वित्वमभ्यासस्य रक् च । ) हिंस्रः । खलः । इत्युणादिकोषः ॥ अश्वः । मङ्गलाभरणम् । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शल, वेगे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) शलति । इति दुर्गादासः ॥

शल, क ङ श्लाघे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् । ) क ङ, शालयते पण्डितं धीरः । इति दुर्गादासः ॥

शल, ङ चलने । वृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् ।) ङ, शलते । चलनं कम्पः । वृतिरिह संवरणम् । इति दुर्गादासः ॥

शल, ज गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) ज, शालः शलः । इति दुर्गादासः ॥

शलं, क्ली, (शल + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः । ) शल्लकीलोम । सजारु-काँटा इति भाषा । तत्पर्य्यायः । शलली २ शललम् ३ । इत्यमरः ॥

शलः, पुं, शललम् । भृङ्गी । चेत्रभेदः । ब्रह्मा । इति मेदिनीशब्दरत्नावल्यौ ॥ कुन्ताख्यम् । इति त्रिकाण्डशेषः ॥ उष्ट्रः । इति हेमचन्द्रः ॥ (वासुकिवंशीयसर्पविशेषः । यथा, महाभारते । १ । ५७ । ५ ।

"कोटिशो मानसः पूर्णः शलः पालो हलीमकः ॥"

शन्तनुराजपुत्रः । यथा, भागवते ।९।२२।१८।

"शलश्च शन्तनोरासीत् गङ्गायां भीष्म आत्मवान् ।"

शल्यराजः । यथा, भागवते । १ । १५ । १६ ।

"गर्भृत्रिगर्त्तशलशैब्यवबाह्लिकाद्यैः ॥"

कंसामात्यः । यथा, तत्रैव । १० । ३६ । २१ ।

"ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥")

शलकः, पुं, मर्कटः । इति त्रिकाण्डशेषः ॥ माकड़्सा इति भाषा ॥

शलङ्गः, पुं, लोकपालः । लवणविशेषः । इत्युणादिकोषः ॥

शलभः, पुं, ( शल + "कृशृशलिकलिगर्द्दिभ्योऽभच् ।" उणा० ३ । १२२ । इति अभच् । ) कीटविशेषः । फड़िं इति पङ्गपाल इति च भाषा । तत्पर्य्यायः । पतङ्गः २ । इत्यमरः ॥ पत्राङ्गः ३ पत्राङ्कः ४ । इति शब्दरत्नावली ॥ स तु ईतिविशेषः । यथा,—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः ॥"

इति ज्योतिस्तत्त्वम् ॥

( असुरविशेषः । यथा, हरिवंशे । ३ । ८८ ।

"शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान् ॥" )

शललं, क्ली, (शल चलनसंवरणयोः + वृषादित्वात् कलः । ) शलम् । इत्यमरः ॥

शलली, स्त्री, ( शलल + गौरादित्वाज्जातित्वाद्वा ङीष् । ) शलम् । इत्यमरः ॥ शली । इति राजनिर्घण्टः ॥

शलाका, स्त्री, ( शल + "बलाकादयश्च ।" उणा० ४।१४ । इति आकः । स्त्रियां टाप् ।) शल्यम् । मदनवृक्षः । शारिका । शल्लकी । छत्रादिकाष्ठी । ( यथा, गुरुगीतायाम् ।

"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥" )

शरः । इति मेदिनी ॥ आलेख्यकूर्च्चिका । इति हेमचन्द्रः ॥ अस्थि । इति शब्दचन्द्रिका ॥

शलाकापरि, व्य, शलाकाक्रीड़ायां पराजयः । यथा । "अक्षशलाकासंख्याः परिणा ।" २।१।१०। द्यूतव्यवहारे पराजये एवायं समासः । अन्ते विपरीतं वृत्तम् । अक्षपरि । एवं शलाकापरि । एकपरि । इति सिद्धान्तकौमुदी ॥ अपि च । नन्वेकस्याक्षस्य शलाकाया वा दूरतोऽन्यथापातनमित्यर्थे अक्षपरि शलाकापरि इत्यव्ययीभावेऽव्ययितयोरव्ययगर्भत्वेऽपि अव्ययपूर्व्वत्वाभावात् । इति शब्दशक्तिप्रकाशिका ॥

शलाकापुरुषाः, पुं, बौद्धानां त्रिषष्टिदेवपुरुषाः । तत्र द्वादश चक्रवर्त्तिनः । चतुर्व्विंशतिर्जिनाः । नव वासुदेवाः । नव बलदेवाः । नव प्रतिवासुदेवाश्च । यथा,—

"यः सर्व्वमङ्गलश्रेणी राजन्यश्च योऽयजत् ।
चक्रवर्त्ती सार्व्वभौमस्ते तु द्वादश भारते ॥
आर्षभिर्भरतस्तत्र सगरस्तु सुमित्रभूः ।
मघवा वैजयिरथाश्वसेननृपनन्दनः ॥
सनत्कुमारोऽथ शान्तिकुन्थुररोजिना अपि ।
शुभूमस्तु कार्त्तवीर्य्यः पद्मः पद्मोत्तरात्मजः ॥
हरिषेणो हरिसुतो जयो विजयनन्दनः ।
ब्रह्मसूनुर्ब्रह्मदत्तः सर्व्वे पैक्ष्वाकुवंशजाः ॥
प्राजापत्यस्त्रिपृष्ठोऽथ द्विपृष्ठो ब्रह्मसम्भवः ।
स्वयम्भू रुद्रतनयः सोमभूः पुरुषोत्तमः ॥
शैविः पुरुषसिंहोऽथ महाशीरः समुद्भवः ।
स्यात् पुरुषपुण्डरीकौ दत्तोऽग्निः सिंहनन्दनः ॥
नारायणो दाशरथिः कृष्णस्तु वसुदेवभूः ।
वासुदेवा अमी कृष्णा नव शुक्ला बलास्त्वमी ॥
अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः ।
आनन्दो नन्दनः पद्मो रामो विष्णुद्विषस्त्वमी ॥
अश्वग्रीवस्तारकश्च मेरको मधुरेव च ।
निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः ।
जिनः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी ॥"

इति हेमचन्द्रः ॥

शलाटः, पुं, शकटपरिमाणम् । यथा,—

"तुलायलशतं तासां विंशत्या भार आचितः ।
शकटः शाकटीनश्च शलाटश्च दशाचितः ॥"

इति हेमचन्द्रः ॥

शलाटुः, त्रि, अपक्वफलम् । इत्यमरः ।२।४।१५॥ ( यथा, सुश्रुते । १ । ४३ ।

"मदनशलाटु चूर्णान्येवं वा वकुलरम्यकोपयुक्तानि मधुलवणयुक्तानीति ॥")

शलाटुः, पुं, मूलविशेषः । इत्युणादिकोषः ॥ विल्वः । इति राजनिर्घण्टः ॥

शलाभोलिः, पुं, उष्ट्रः । इति हेमचन्द्रः ॥

शलालु, क्ली, सुगन्धिद्रव्यविशेषः । इति सिद्धान्तकौमुदी ॥

शलालुकः, त्रि, शलालुना क्रीतं वस्तु । यथा । "शलालुनोऽन्यतरस्याम् ।" ४ । ४ । ५४ । इति पक्षे ठक् । शलालुकः । शलालुकी । शलालुकः । शालालुकी । शलालु सुगन्धिद्रव्यविशेषः । इति सिद्धान्तकौमुदी ।

शली, स्त्री, ( शलं शल्लकीलोम अस्त्यस्या इति । शल + अच् । ङीष् । ) स्वल्पशल्यकः । तत्पर्य्यायः । शलली २ श्वावित् ३ । अस्य मांसगुणाः । गुरुत्वम् । स्निग्धत्वम् । शीतलत्वम् । कफपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

शल्कं, क्ली, ( शल चलने वृतौ + "दृशभीकापाशल्यतिमर्च्चिभ्यः कन् ।" उणा० ३ । ४३ । इति कन् । ) खण्डम् । वल्कलम् । इत्यमरः ॥ मत्स्यत्वक् । आँइस इति भाषा । यथा,—

"शल्कं स्यात् वल्कले खण्डे शल्कन्तु मत्स्यवल्कले ॥"

इति भरतधृतकोषः ॥

( यथा, महाभारते । १२ । ३६ । २३ ।

"अभक्ष्या ब्राह्मणैर्मत्स्याः शल्कैर्ये वै विवर्जिताः ॥")

शल्कलं, क्ली, मत्स्यवल्कलम् । वृक्षत्वक् । शलधातोः कलच्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शल्कली, [न्] पुं, (शल्कलमस्यास्तीति । शल्कल + इनिः । ) मत्स्यः । इति शब्दरत्नावली ॥

शल्की, [ न् ] पुं, ( शल्कमस्यास्तीति । शल्क + इनिः । ) मत्स्यः । इति हेमचन्द्रः ॥

शल्यदा, शल्यपर्णिका, } स्त्री, मेदा । इति राजनिर्घण्टः ॥

शल्भ, ङ कत्थने । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) ङ, शल्भते । कत्थनं प्रशंसा । इति दुर्गादासः ॥

शल्मलिः, पुं, शाल्मलीवृक्षः । ( यथा, वाजसनेयसंहितायाम् । २३ । १३ । "शाल्मलिर्वृद्ध्या ।" "शाल्मलिर्वृक्षविशेषो वृद्ध्या त्वामवतु शल्मलिर्वनस्पतीनां वर्षिष्ठं वर्द्धते इति श्रुतेः ।" इति तद्भाष्यम् ॥ )

शल्मली, स्त्री, शाल्मलिवृक्षः । यथा,—

"शल्मलिः स्यात् शाल्मलिश्च शाल्मली शल्मली तथा ॥"

इति भरतद्विरूपकोषः ॥

शल्यं, क्ली, ( शलति चलतीति । शल + "सानसिवर्णसिपर्णसीति ।" उणा० ४ । १०७ । इति